रोल नं ....................

# 1031 - A

## कक्षा 10वीं त्रैमासिक परीक्षा, 2022-23

## संस्कृत – 229

(माध्यम हिन्दी)

( कुल प्रश्नों की संख्या : 23) ( कुल मुद्रित पृष्ठों की संख्या : 05)
(समय : 03 घंटे) (पूर्णांक : 80)

---

निर्देशाः 1. सर्वे प्रश्नाः अनिवार्याः सन्ति।
2. प्रश्नानां सम्मुखे अंकः प्रदत्ताः

**प्रश्न 1.** उचित विकल्पं चित्वा लिखत— **1 × 6 = 6**

(क) 'रामाणाम्' इत्यस्मिन् शब्दे विभक्ति अस्ति—
(अ) द्वितीया (ब) पञ्चमी (स) चतुर्थी (द) षष्ठी।

(ख) 'चन्द्रमस्' इत्यस्य शब्दस्य तृतीया विभक्ति एकवचने रूपं भवति—
(अ) चन्द्रमसा (ब) चन्द्रेण (स) चन्द्रमा (द) सर्वेऽपि।

(ग) 'मह्यम्' इत्यस्मिन् शब्दे विभक्ति अस्ति—
(अ) द्वितीया (ब) तृतीया (स) चतुर्थी (द) पंचमी।

(घ) 'काम्' शब्दस्य रूपम् अस्ति—
(अ) पुल्लिंग (ब) स्त्रीलिंग (स) नपुंसकलिंग (द) सर्वेऽपि।

(ङ) 'इदानीम् अहं संस्कृतं पठामि' इत्यस्मिन् वाक्ये अव्यय पदम् अस्ति —
(अ) अहम् (ब) इदानीम् (स) संस्कृत (द) पठामि।

(च) अधोलिखितेषु अव्ययं नास्ति—
(अ) तत्र (ब) किन्तु (स) अलम् (द) एव।

प्र. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (1×6=6)

(i) "नास्ति" इत्यस्मिन पदे व्यञ्जनसंधिः अस्ति।

(ii) "सदैव" वृद्धि सन्धेः उदाहरणं वर्तते।

(iii) "मनः + हरः" इत्यत्र विसर्गसन्धिः अस्ति।

(iv) अन्य पद प्रधानः बहुव्रीहिः समासः अस्ति।

(v) समासाः षड् भवन्ति।

(vi) "घनश्यामः" इत्यस्मिन् पदे कर्मधारयः समासः वर्तते।

**प्रश्न 3. उचित मेलनम् कुरुत—** **1 × 6 = 6**

| (अ) | (ब) |
|---|---|
| (i) मन: + रथ: | (क) तत्पुरुष समास |
| (ii) महेन्द्र | (ख) मनोरथ: |
| (iii) वंशहीन: | (ग) गुणस्वर सन्धि |
| (iv) कृष्णसर्प: | (घ) यणस्वर सन्धि |
| (v) यथाशक्ति | (ङ) कर्मधारय समास |
| (vi) इत्यादि | (च) अव्ययीभाव समास। |

**प्रश्न 4. एकपदेन उत्तरम् लिखत—** **1 × 6 = 6**

(क) अहं कस्मै जीवनं कामये ?
(ख) क: पिपासित: म्रियते ?
(ग) प्राणेभ्योऽपि क: रक्षणीय: ?
(घ) 'जेतुम्' इत्यस्मिन् पदे प्रत्ययोऽस्ति।
(ङ) 'धर्म + ठक्' इत्यस्य पद्म भविष्यति।
(च) 'कोकिला' इत्यस्मिन् पदे प्रत्यय: अस्ति।

**प्रश्न 5. प्रदत्तै: शब्दै: रिक्तस्थान पूर्तिं कुरुत—** **1 × 6 = 6**

**( सर्प:, मानवाय, पण्डित:, उज्जवल, पशुपति, काननम् )**

(क) 'दानवाय' इत्यस्य विलोम पदं.................... अस्ति।
(ख) 'मूर्ख:' इत्यस्य विलोम पदं ................. अस्ति।
(ग) 'चन्द्र इव उज्जवल' इत्यस्मिन् पदे ................. विशेषणं अस्ति।
(घ) 'कृष्ण सर्प:' इत्यस्मिन् पदे .................. विशेष्य अस्ति।
(ङ) 'वनम्' इत्यस्य पर्याय पदं ............. अस्ति।
(च) 'शिव:' इत्यस्य पर्याय पदं ............. अस्ति।

**प्रश्न 6. अधोलिखितवाक्येषु वाक्यद्वयस्य वाच्य परिवर्तनं कुरुत—** **2**

(क) सुमित: पुस्तकं पठति। (ख) क: छायां निवारयति। (ग) लतया गीतं गायते।

प्रश्न 7 कृषक: किं करोति स्म ? **2**

**अथवा**

स्वस्थ जीवने कीदृशे वातावरणे भ्रमणीयम् ?

प्रश्न 8 बुद्धिमती केन उपेता पितृगृहं प्रति चलिता ? **2**

**अथवा**

मातु: अधिका कृपा कस्मिन् भवति ?

प्रश्न 9 कियता बलेन व्यायाम: कर्तव्य: ? **2**

**अथवा**

कवि: कुत्र सञ्चरणं कर्तुम् इच्छति ?

प्रश्न 10 कस्य विरूद्धमापि भोजनं परिपच्यते ? 2

अथवा

कविः किमर्थं प्रकृतेः शरणम् इच्छति ?

प्रश्न 11 जननी तुल्यवत्सला पाठे कयोः संवादः विद्यते ? 2

अथवा

जरा कस्य सकाशं सहसा न समाधिरोहति ?

प्रश्न 12 स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरूत (कोऽपि द्वौ) 2

(क) व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः अवदत्

(ख) बुद्धिमती चपेटया पुत्रौ प्रहृतवती।

(ग) त्वं मानुषात् विभेषि।

(घ) शरीरस्य आयासजननं कर्म व्यायामः इति कथ्यते।

प्रश्न 13 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत — 2

(क) व्याघ्रंदृष्ट्वा सा पुत्रौ ताडयन्ती उवाच — अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्

(ख) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता ।

(ग) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(घ) मार्गे सा एकं व्याघ्रम् अपश्यत्।

प्रश्न 14 युग्ममेलनं कुरूत — 2

| 'अ' | 'ब' |
|---|---|
| (क) आम्रम् | (i) नेत्राभ्याम् |
| (ख) पाषाणः | (ii) रसालम् |
| (ग) श्रृगालः | (iii) प्रस्तरः |
| (घ) चक्षुर्भ्याम् | (iv) जम्बुकः |

प्रश्न 15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः (कोऽपि द्वौ) 2

(क) श्री गणेशं नमः

(ख) अहं पुस्तकं पठति ।

(ग) बालकः फलं खादन्ति।

(घ) वृक्षस्य पत्रं पतति।

16 अधोलिखितम् गद्यांशम् सम्यक पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत — 3

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमति पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

प्रश्नाः (i) ग्रामस्य नाम किम् अस्ति ?

(ii) तत्र राजसिंहः नाम कः वसति स्म ?

(iii) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता ?

अथवा

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।

प्रश्नाः (i) कः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ?

(ii) एकः बलीवर्दः कीदृशः आसीत् ?

(iii) कृषकः कं तोदनेन नुद्यमानः अवर्तत ?

प्रश्न 17 अधोलिखितं पद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत — 3

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।

कुत्सितवस्तु मिश्रितं भक्ष्यं समलं धरातलम्।

करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्॥

प्रश्नाः (i) भृशं दूषितं किम् अस्ति ?

(ii) धरातलं कीदृशम् अस्ति ?

(iii) कीदृशम् जलं नास्ति ?

प्रश्न 18 अधोलिखितानां पदानाम् अर्थः किम्? कोष्ठकात् चित्वा लिखत। (कोऽपि त्रयः) 3

| | | |
|---|---|---|
| (क) ददर्श | — | (दर्शितवान्, दृष्टवान्) |
| (ख) जगाद | — | (अकथयत्, अगच्छत्) |
| (ग) ययौ | — | (याचितवान्, गतवान्) |
| (घ) अत्तुम् | — | (खादितुम्, आविष्कर्तुम्) |
| (ङ) मुच्यते | — | (मुक्तो भवति, मग्नो भवति) |
| (च) ईक्षते | — | (पश्यति, इच्छति) |

प्रश्न 19 प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत। (कोऽपि त्रयः) — 3

(भृशम्, यत्र–तत्र, बहिः, एव, सदृशः, सहसा)

(i) पर्यावरणस्य संरक्षणम् .................................. प्रकृतेः आराधना।

(ii) व्यायामेन................किञ्चित् स्थौल्यपकर्षणं नास्त।
(iii) व्यायामिनः जनस्य सकाशं वार्धक्य..................नायाति।
(iv) ..................हरीतिमा............शुचि पर्यावरणम्।
(v) भूकम्पित समये ....................गगनमेषु उचित भवति।
(vi) तदानी वायुमंडलं........................प्रदूषितमास्त।

प्रश्न 20 प्रश्नपत्रे समागतान् श्लोकान विहाय स्वपाठ्यपुस्तकस्य श्लोकद्वयं लिखत। 4

प्रश्न 21 स्वप्राचार्यस्य कृते अवकाशाथम् एकं प्रार्थनापत्र संस्कृते लिखत। 4

अथवा

स्वभ्रातुः जन्मदिनोत्सवस्य कृते स्वमित्राय आमन्त्रणपत्रम् संस्कृते लिखत।

प्रश्न 22 अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत – 4

सतां सज्जनानां सङ्गतिः सम्पर्कः संसर्गो वा सत्सङ्गतिः इति कथ्यते। वस्तुतः सत्सङ्गात् एव मानवः समुन्नतो भवति सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्तं "संसर्गजाः दोषगुणाः भवन्ति" इति। अतः स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेव सतसङ्गतिर्विधेयः।

प्रश्नाः (i) अस्य गद्यांशस्य शीर्षकं लिखत।

(ii) केन जनः सज्जनः भवति।

(iii) स्वसमुन्नतिम् इच्छता जनेन किं करणीय

(iv) दुर्जनः शब्दस्य विलोमपदं लिखत।

प्रश्न 23 अधोलिखितेषु एकं विषयं स्वीकृत्य विंशत्याधिक शतशब्देषु (120) संस्कृतभाषायां निबन्धं लिखत 4

(क) व्यायामः
(ख) संस्कृतभाषायाः महत्वम्
(ग) पर्यावरणम्
(घ) महाकविः कालिदासः

—————————————